CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 405

Title Punyaha vāçan

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 405 Subject: Vedic Rit.

Title: Puṇyāha Vācan

Author: —— Scribe: Nilakaṇṭha

Date of the work: —— Date of the Ms.: ——

Place of the work: —— Place of the Ms.: ——

Size: 7.4" by 4.4" Extent: 4 foll

Language: Sanskrit Script: Devanāgarī

Remarks: ——

॥श्री॥ संपूज्य गंधमाल्याद्यैर्ब्राह्मणान्स्वस्ति वाचयेत्॥ धर्मकर्मणि मांग
ल्ये संग्रामाद्भुतदर्शने॥१॥ पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते
एतदेव निरोंकारं कुर्यात्क्षत्रियवैश्ययोः॥२॥ अवनिकृतजानुमं
डलं कमलमुकुलसदृशमंजलिं शिरस्याधाय दक्षिणेन पाणिना
सुवर्णपूर्णकलशं धारयित्वा दाघानिनांगानवोगिरयस्त्रीणि विष्णु
पदानि च॥ तेन आयुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु॥ शिवा आ
पः संतु॥ सौमनस्यमस्तु॥ अक्षतं चारिष्टं चास्तु॥ गंधाः पांतु॥
मांगल्यं चास्तु॥ पुष्पाणि पांतु॥ सुश्रियमस्तु॥ अक्षताः पांतु॥ आ
युष्यमस्तु॥ तांबूलानि पांतु॥ ऐश्वर्यमस्तु॥ दक्षिणाः पांतु॥ आरो ॥१॥
ग्यमस्तु॥ दीर्घमायुः शांतिः पुष्टिस्तुष्टिः श्रीर्यशो विनयो वित्तं बहु विधा१

प्रवर्त्तंतां॥२
पुत्रं बहुधनं चायुष्यं चास्तु॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारि
२स्तुना भाः शोभनाः प्रवर्त्तंते॥ तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं २
बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये॥
वाच्यतां॥ द्रविणोदा०१ सविता पश्चात्तात्०२ नवोनवो भवति०३॥ उद्वादि २४
दिवं०४॥ इत्येता ऋचयः पुण्याहे ब्रूयात्॥ व्रतनियमतपःस्वाध्यायक्र
तुशमदमदानक्रियाविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीय
तां॥ समाहितमनसः स्म॥ प्रसीदंतु भवतः॥ प्रसन्नाः स्म॥ शांतिर
स्तु॥ पुष्टिरस्तु॥ तुष्टिरस्तु॥ ऋद्धिरस्तु॥ वृद्धिरस्तु॥ अविघ्नम
स्तु॥ आयुष्यमस्तु॥ आरोग्यमस्तु॥ शिवं कर्मास्तु॥ कर्मसमृद्धिरस्तु॥
वेदसमृद्धिरस्तु॥ शास्त्रसमृद्धिरस्तु॥ पुत्रसमृद्धिरस्तु॥ धन
धान्य

समृद्धिरस्तु॥ इष्टसंपदस्तु॥ अनिष्टनिरसनमस्तु॥ यत्पापं तत्प्र
तिहतमस्तु॥ यच्छ्रेयस्तदस्तु॥ उत्तरे कर्मण्यविघ्नमस्तु॥ उ
त्तरोत्तरमहरहरभिवृद्धिरस्तु॥ उत्तरोत्तराः क्रियाः शोभनाः शुभाः संपद्यंते॥
संपद्यंतां॥ तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु॥ तिथिकरणमुहू
र्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां॥ तिथिकरणे समुहूर्त्ते सन
क्षत्रे सग्रहे सदैवते प्रीयेतां॥ दुर्गापांचाल्यौ प्रीयेतां॥ अग्निपुरोगा वि
श्वेदेवाः प्रीयंतां॥ इंद्रपुरोगा मरुद्गणाः प्रीयंतां॥ वसिष्ठपुरोगा ऋ
षिगणाः प्रीयंतां॥ महेश्वरपुरोगा उमामातरः प्रीयंतां॥ अरुंधती
पुरोगा एकपत्न्यः प्रीयंतां॥ विष्णुपुरोगाः सर्वे देवाः प्रीयंतां॥ ब्रह्मपुरो २
गाः सर्वे वेदाः प्रीयंतां॥ ब्रह्म च ब्राह्मणाश्च प्रीयंतां॥ श्रीसरस्वत्यौ
प्रीयेतां॥ श्रद्धामेधे प्रीयेतां॥

पुंडिका २

भगवती कात्यायनी प्रीयतां॥ भगवती माहेश्वरी प्रीयतां॥ भगवती
भगवती ऋद्धिकरी प्रीयतां॥ भगवती वृद्धिकरी प्रीयतां॥ भगवती पु
ष्टिकरी प्रीयतां॥ भगवती तुष्टिकरी प्रीयतां॥ भगवंतौ विघ्नविना
यकौ प्रीयेतां॥ सर्वाः कुलदेवताः प्रीयंतां॥ सर्वा ग्रामदेवताः प्रीयं
तां॥ हता ब्रह्मद्विषः॥ हताः परिपंथिनः॥ हताश्च विघ्नकर्त्तारः॥ अह
ताश्च विघ्नकराः॥ शत्रवः पराभवं यांतु॥ शाम्यंतु घोराणि॥ शाम्यं
तु पापानि॥ शाम्यंत्वीतयः॥ शुभानि वर्द्धंतां॥ शिवा आपः संतु॥ शि
शिवा ऋतवः संतु॥ शिवा अग्नयः संतु॥ शिवा आहुतयः संतु॥ शि
वा वनस्पतयः संतु॥ शिवा ओषधयः संतु॥ शिवा अतिथयः संतु॥
अहोरात्रे शिवे स्यातां॥ निकामे निकामे० ॥ शुक्रांगारकबुधबृ
हस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्र

पुरः नुना कायाय स्पुण्यं तन्नौ दस्तु ॥ वषट्कारगयलुण्यतनद स्त्याया अयाय पुण्यं तन्नदस्तु

णः प्रीयंतां ॥ भगवान् स्वामीनारायणः प्रीयतां ॥ भगवान् स्वामी पर्जन्यः स्तु ॥ प्रात
प्रीयतां ॥ भगवान् स्वामी महासेनः प्रीयतां ॥ पुण्याहकालं वाचयिष्ये ॥ वा स्वेदि येद
च्यतां ॥ ब्राह्मं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकं ॥ वेदवृक्षोद्भवं नि स्तु पुण्यं त न्नदस्तु
मम १ त्यं तत्पुण्याहं ब्रुवंतु नः ॥ ब्राह्मणाः सकुटुंबस्य सपरिवारस्य गृहे ॥ स्तस्तु
पुण्याहं ३ पुण्याहं भवंतो ब्रुवंतु ३ ॥ ॐ ऊ नेव श° १ ॥ पुनंतु मा° १ ॥ पुनानः सोम° ॥ स्यात
श्री बीजं साम ॥ सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ॥ संपूर्णा सुप्रभा पुनं
वा सा तां ऋद्धिं ब्रुवंतु नः ॥ १ ॥ ब्राह्मणाः मम स° गृहे ऋद्धिं भवंतो ब्रु पुण्यं २
वंतु ३ ॥ ऋध्यतां ३ ॥ ऋध्याम° ॥ सत्रस्य ऋद्धि° १ ॥ ॐ देवा° साम ॥
स्थापेयं पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतं ॥ ऋषिभिः सगंधर्वैः
स्तत्कल्याणं ब्रुवंतु नः ॥ ब्राह्मणाः मम स° गृहे कल्याणं भवंतो ब्रु २
वंतु ३ ॥ कल्याणं ३ ॥ आ° सोम° १ ॥ ऋ° ॥ यथेमां वाचं° कां° ॥ कायान्नमि ॥

स्वस्तिर्याऽविनाशाख्या पुण्यकल्याणऋद्धिदा ॥ विनायकप्रिया नित्यं
तां च स्वस्तिं ब्रुवंतु नः ॥ ब्राह्मणाः मम सकुटुंबस्य गृहे स्वस्तिं भवंतो ब्रु
वंतु ३ ॥ स्वस्ति ३ ॥ स्वस्तिरिद्धि° ॥ स्वस्ति न इंद्र° कां ॥ त्रातारमिंद्र° साम ॥
क्षीरोदधिसमुद्भूता मथ्यमाने महोदधौ ॥ विष्णोश्चैव प्रिया नित्यं तां श्रि
यं च स्तु ब्रुवंतु नः ॥ ब्राह्मणाः मम स° गृहे श्रीरस्त्विति भवंतो ब्रुवंतु २
अस्तु श्रीः ॥ पुण्याहसमृद्धिरस्तु ॥ भगवान् प्रजापतिः प्रीयतां ॥
इति पुण्याहवाचनं ॥

स्वागतंमोद्विजश्रेष्ठमदनुग्रहकारकः। इदमर्घ्यमिदंपाद्यंनवाद्भिःप्रतिगृह्यतां
यद्यद्द्रव्यंयावद्यावत्संख्याकंयेनयेनमंत्रेणऽतेनतस्यैतस्यैदेवतायैसमा
सादेवताप्रीयतां ॥ दी। नीलकंठनांपत्र ४